শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে একৱিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একৱিংশং দশকম্॥

## জম্বূদ্বীপাদিষু ভগৱদুপাসনাপ্রকারৱর্ণনম্

মধ্যোদ্ভৱে ভুৱ ইলাৱৃতনাম্নি ৱর্ষে
গৌরীপ্রধানৱনিতাজনমাত্রভাজি।
শর্ৱেণ মন্ত্রনুতিভিঃ সমুপাস্যমানং
সঙ্কর্ষণাত্মকমধীশ্ৱর সংশ্রযে ৎৱাম্॥ **21.1**॥

ভদ্রাশ্ৱনামক ইলাৱৃতপূর্ৱৱর্ষে
ভদ্রশ্রৱোভিরৃষিভিঃ পরিণূযমানম্।
কল্পান্তগূঢনিগমোদ্ধরণপ্রৱীণং
ধ্যাযামি দেৱ হযশীর্ষতনুং ভৱন্তম্॥ **21.2**॥

ধ্যাযামি দক্ষিণগতে হরিৱর্ষৱর্ষে
প্রহ্লাদমুখ্যপুরুষৈঃ পরিষেৱ্যমাণম্।
উত্তুঙ্গশান্তধৱলাকৃতিমেকশুদ্ধ -
জ্ঞানপ্রদং নরহরিং ভগৱন্ ভৱন্তম্॥ **21.3**॥

ৱর্ষে প্রতীচি ললিতাত্মনি কেতুমালে
লীলাৱিশেষললিতস্মিতশোভনাঙ্গম্।
লক্ষ্ম্যা প্রজাপতিসুতৈশ্চ নিষেৱ্যমাণং
তস্যাঃ প্রিযায ধৃতকামতনুং ভজে ৎৱাম্॥ **21.4**॥

রম্যে হ্যুদীচি খলু রম্যকনাম্নি ৱর্ষে
তদ্ৱর্ষনাথমনুৱর্যসপর্যমাণম্।

ভক্তৈকৱৎসলমমৎসরহৃৎসু ভান্তং
    মৎস্যাকৃতিং ভুৱননাথ ভজে ভৱন্তম্॥ **21.5**॥

ৱর্ষং হিরণ্ময়সমাহ্ৱযমৌত্তরাহ -
    মাসীনমদ্রি ধৃতিকর্মঠকামঠাঙ্গম্।
সংসেৱতে পিতৃগণপ্রৱরোঽর্যমা যং
    তং ৎৱাং ভজামি ভগৱন্ পরচিন্ময়াত্মন্॥ **21.6**॥

কিঞ্চোত্তরেষু কুরুষু প্রিযযা ধরণ্যা
    সংসেৱিতো মহিতমন্ত্রনুতিপ্রভেদৈঃ।
দংষ্ট্রাগ্রঘৃষ্টঘনপৃষ্ঠগরিষ্ঠৱর্ষ্মা
    ৎৱং পাহি ৱিজ্ঞনুত যজ্ঞৱরাহমূর্তে॥ **21.7**॥

যাম্যাং দিশং ভজতি কিম্পুরুষাখ্যৱর্ষে
    সংসেৱিতো হনুমতা দৃঢভক্তিভাজা।
সীতাভিরামপরমাদ্ভুতরূপশালী
    রামাত্মকঃ পরিলসন্ পরিপাহি ৱিষ্ণো॥ **21.8**॥

শ্রীনারদেন সহ ভারতখণ্ডমুখ্যৈ -
    স্ত্ৱং সাঙ্খ্যযোগনুতিভিঃ সমুপাস্যমানঃ।
আকল্পকালমিহ সাধুজনাভিরক্ষী
    নারাযণো নরসখঃ পরিপাহি ভূমন্॥ **21.9**॥

প্লাক্ষেঽর্করূপমযি শাল্মল ইন্দুরূপং
    দ্বীপে ভজন্তি কুশনামনি ৱহ্নিরূপম্।
ক্রৌঞ্চেঽম্বুরূপমথ ৱাযুমযং চ শাকে
    ৎৱাং ব্রহ্মরূপমযি পুষ্করনাম্নি লোকাঃ॥ **21.10**॥

সর্ৱৈর্ধ্রুৱাদিভিরুডুপ্রকরৈর্গ্রহৈশ্চ
    পুচ্ছাদিকেষ্ৱৱযৱেষ্ৱভিকল্প্যমানৈঃ।

ৎৱং শিংশুমারৱপুষা মহতামুপাস্যঃ
সন্ধ্যাসু রুন্ধি নরকং মম সিন্ধুশাযিন্॥ **21.11** ॥

পাতালমূলভুৱি শেষতনুং ভৱন্তং
লোলৈককুণ্ডলৱিরাজিসহস্রশীর্ষম্।
নীলাম্বরং ধৃতহলং ভুজগাঙ্গনাভি -
র্জুষ্টং ভজে হর গদান্ গুরুগেহনাথ॥ **21.12** ॥

॥ ইতি শ্ৰীমন্নারাযণীযে একৱিংশং দশকং সমাপ্তম্॥